# Shiva Stuti by Skanda and Sthanakalpana Varnanam by Shiva

# સ્કન્દકૃતા શિવસ્તુતિઃ એવં શિવપ્રોક્તં સ્થાનકલ્પનવર્ણનમ્

## Document Information

Text title : Shiva Stuti by Skanda 2 and Sthanakalpana Varnanam by Shiva

File name : sthAnakalpanavarNanamskandakRRitAshivastutiHevaMshivaproktam.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 27||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

Shiva Stuti by Skanda and Sthanakalpana Varnanam by Shiva

# સ્કન્દકૃતા શિવસ્તુતિઃ એવં શિવપ્રોક્તં સ્થાનકલ્પનવર્ણનમ્

સ્કન્દઃ -
શશિખણ્ડશિખણ્ડમણ્ડનં વિધિમુણ્ડામલષણ્ડકણ્ઠમાલમ્ ।
ધૃતનાગસુકુણ્ડલં ભજે હતચણ્ડાંશુસુતપ્રચણ્ડગર્વકાણ્ડમ્ ॥ ૧૦૮॥

અખણ્ડબોધાય સુચણ્ડદીધિતિપ્રચણ્ડનેત્રં કૃતતાણ્ડવં સદા ।
ભજામિ વેતણ્ડમુખસ્તુતં મુદા સુમેરુકોદણ્ડધરાખિલાણ્ડગમ્ ॥ ૧૦૯॥

સુચણ્ડબાહું રણચણ્ડવિક્રમં સુપુણ્ડરીકોજ્જ્વલહારલીલમ્ ।
તં ખણ્ડપર્શું પ્રણમામિ શમ્ભુમાખણ્ડલાદ્યૈરભિવન્દનીયમ્ ॥ ૧૧૦॥

મુનીન્દ્રવર્યૈરખિલૈઃ સમર્ચિતં કરીન્દ્રકુમ્ભસ્થિતપાદપદ્મમ્ ।
ગિરીન્દ્રજાપ્રાણસખં ભજે શિવં વિધીન્દ્રનારાયણવેદસંસ્તુતમ્ ॥ ૧૧૧॥

ભુજઙ્ગહારં ગલનીલકન્ધરં મહાજટાભારધરં હરં સદા ।
ભજામિ ગઙ્ગાધરમીશિતારં પરાત્પરં કાલહરં મહેશ્વરમ્ ॥ ૧૧૨॥

વસુધાધરધારકં મહેશમમરેન્દ્રં ચ સુધાકરોરુચૂડમ્ ।
પ્રણમામ્યર્જુનદીપ્તિદીધિતિં ભગવન્તં તમગાધબોધદમ્ ॥ ૧૧૩॥

જગતાં મમ દેવદેવ શમ્ભો જનકસ્ત્વં ભગવન્નુમા જનિત્રી ।
પ્રિયપુત્રે મયિ દત્તમેતદાદ્યં શ્રુતિગુહ્યં જગતો વિમુક્તયે ॥ ૧૧૪॥

શિવગૌરીસંવાદે ઈશ્વરઃ -
ઇતિ સ્તુતોઽહં સ્કન્દેન સ્તોત્રવર્યેણ સત્તમે ।
અવોચં તં તદા સ્કન્દં તત્સ્તુત્યા તોષિતોઽમ્બિકે ॥ ૧૧૫॥

ઈશ્વરઃ -
સ્કન્દ ત્વત્કૃતભક્તિશક્તિભિરહો સ્તુત્યં સ્તુવન્ માં મુદા
યુક્તઃ પાતકવર્ગજાતસહિતો મુક્તઃ સ વૈ પુણ્યભાક્ ।
તસ્મૈ તદ્વયુનં દિશામિ ચ યદા શક્તોઽસ્તુ તત્વાધિકઃ ॥ ૧૧૬॥

વસ ત્વં ભૂધરે સ્કન્દ સિંહાદ્રૌ સુરસેવિતે ।
સ્વામિપુષ્કરિણીતીરે નાનાવૃક્ષૈકશોભિતે ॥ ૧૧૭॥

નિવાસો વિહિતસ્તેઽદ્ય યાવદાભૂતસમ્પ્લવમ્ ।
મદાજ્ઞયા યયૌ સ્કન્દો બ્રહ્માદિવિબુધૈઃ સહ ॥ ૧૧૮॥

શિવગૌરીસંવાદે ઈશ્વરઃ -
પ્રણમ્ય માં તદા દેવિ શ્રીશૈલેશં કૃપાનિધિમ્ ।
સમ્પૂજ્ય ભ્રમરામ્બાં ત્વાં નત્વા સ્કન્દો ગણૈર્વૃતઃ ॥ ૧૧૯॥

બિલ્વૈઃ પદ્મૈસ્તથા પૂજ્ય પ્રદક્ષિણપુરઃસરમ્ ।
ભુજઙ્ગેનોજ્વલચ્ચઞ્ચ્વા કેકારાવૈર્વિરાજતા ॥ ૧૨૦॥

મયૂરેણોહ્યમાનશ્ચ યયૌ સ્કન્દઃ સુરૈર્વૃતઃ ।
સ્વામિપુષ્કરિણીતીરે સિંહાદ્રૌ ભક્તિભાવિતઃ ॥ ૧૨૧॥

ઉવાસ ચ તદા સ્કન્દો દેવીં શક્તિધરસ્તદા ।
શ્રીશૈલેશ્વરલિઙ્ગમેતદમલં મુક્તિપ્રદં શાશ્વતં
દૃષ્ટં યેન સમસ્તપુણ્યફલદં સ્વર્ગાપવર્ગપ્રદમ્ ।
તેનેર્વી સકલા સુશામ્ભવવરે દત્તઽખિલૈઃ પાતકૈઃ
મુક્તો મત્કથયા સ્વસુન્દરતરે શ્રોત્રે ચ પાત્રીકૃતે ॥ ૧૨૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દકૃતા શિવસ્તુતિઃ અથવા શિવપ્રોક્તં સ્થાનકલ્પનવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૭॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 27..

Notes:

Having received the requested Gyanopadesha from Shiva, after being redeemed from the curse of Shukracharya; Skanda recites Stuti to Shiva at Shri Shailam. Skanda also eulogises His Mother - Parvati, and receives Shakti (Vel) as blessing. Shiva being pleased thus, blesses Skanda and directs Him to reside in the Simhadri range near Swami Pushkarini. Shiva reiterates to Devi, the merits of worshipping Shri Shaileshwara Linga.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

*Shiva Stuti by Skanda and Sthanakalpana Varnanam by Shiva*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*